# prashnottararatnamAlikA

# પ્રશ્નોત્તરરત્નમાલિકા

## Document Information

Text title : prashnottararatnamAlikA

File name : prashnottara.itx

Category : vedanta, shankarAchArya

Location : doc_z_misc_shankara

Transliterated by : Sorin Suciu aka SeSe at sorins at hotmail.com

Proofread by : Sorin Suciu aka SeSe at sorins at hotmail.com

Latest update : November 1, 2010

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# પ્રશ્નોત્તરરત્નમાલિકા

કઃ ખલુ નાલઙ્ક્રિયતે દૃષ્ટાદૃષ્ટાર્થસાધનપટીયાન્ ।
અમુયા કણ્ઠસ્થિતયા પ્રશ્નોત્તરરત્નમાલિકયા ॥ ૧॥

ભગવન્ કિમુપાદેયં ગુરુવચનં હેયમપિ કિમકાર્યમ્ ।
કો ગુરુઃ અધિગતતત્ત્વઃ શિષ્યહિતાયોદ્યતઃ સતતમ્ ॥ ૨॥

ત્વરિતં કિં કર્તવ્યં વિદુષાં સંસારસન્તતિચ્છેદઃ ।
કિં મોક્ષતરોર્બીજં સમ્યક્જ્ઞાનં ક્રિયાસિદ્ધમ્ ॥ ૩॥

કઃ પથ્યતરો ધર્મઃ કઃ શુચિરિહ યસ્ય માનસં શુદ્ધમ્ ।
કઃ પણ્ડિતો વિવેકી કિં વિષમવધીરણા ગુરુષુ ॥ ૪॥

કિં સંસારે સારં બહુશોઽપિ વિચિન્ત્યમાનમિદમેવ ।
કિં મનુજેષ્વિષ્ટતમં સ્વપરહિતાયોદ્યતં જન્મ ॥ ૫॥

મદિરેવ મોહજનકઃ કઃ સ્નેહઃ કે ચ દસ્યવો વિષયાઃ ।
કા ભવવલ્લિ તૃષ્ણા કો વૈરી યસ્ત્વનુદ્યોગઃ ॥ ૬॥

કસ્માદ્ભયમિહ મરણાદન્ધાદિહ કો વિશિષ્યતે રાગી ।
કઃ શૂરો યો લલનાલોચનબાણૈર્ન ચ વ્યથિતઃ ॥ ૭॥

પાન્તું કર્ણાઞ્જલિભિઃ કિમમૃતમિહ યુજ્યતે સદુપદેશઃ ।
કિં ગુરુતાયા મૂલં યદેતદપ્રાર્થનં નામ ॥ ૮॥

કિં ગહનં સ્ત્રીચરિતં કશ્ચતુરો યો ન ખણ્ડિતસ્તેન ।
કિં દુઃખં અસન્તોષઃ કિં લાઘવમધમતો યાચ્ઞા ॥ ૯॥

કિં જીવિતમનવદ્યં કિં જાડ્યં પાઠતોઽપ્યનભ્યાસઃ ।
કો જાગર્તિ વિવેકી કો નિદ્રા મૂઢતા જન્તોઃ ॥ ૧૦॥

નલિનીદલગતજલવત્તરલં કિં યૌવનં ધનં ચાયુઃ ।
કથય પુનઃ કે શશિનઃ કિરણસમાઃ સજ્જના એવ ॥ ૧૧॥

કો નરકઃ પરવશતા કિં સૌખ્યં સર્વસઙ્ગવિરતિર્યા ।
કિં સત્યં ભૂતહિતં પ્રિયં ચ કિં પ્રાણિનામસવઃ ॥ ૧૨॥

કોઽનર્થફલો માનઃ કા સુખદા સાધુજનમૈત્રી ।
સર્વવ્યસનવિનાશે કો દક્ષઃ સર્વથા ત્યાગી ॥ ૧૩॥

કિં મરણં મૂર્ખત્વં કિં ચાનર્ઘં યદવસરે દત્તમ્ ।
આમરણાત્ કિં શલ્યં પ્રચ્છન્નં યત્કૃતં પાપમ્ ॥ ૧૪॥

કુત્ર વિધેયો યત્નો વિદ્યાભ્યાસે સદૌષધે દાને ।
અવધીરણા ક્વ કાર્યા ખલપરયોષિત્પરધનેષુ ॥ ૧૫॥

કાહર્નિશમનુચિન્ત્યા સંસારાસારતા ન તુ પ્રમદા ।
કા પ્રેયસી વિધેયા કરુણા દીનેષુ સજ્જને મૈત્રી ॥ ૧૬॥

કણ્ઠગતૈરપ્યસુભિઃ કસ્ય હ્યાત્મા ન શક્યતે જેતુમ્ ।
મૂર્ખસ્ય શઙ્કિતસ્ય ચ વિષાદિનો વા કૃતઘ્નસ્ય ॥ ૧૭॥

કઃ સાધુઃ સદવૃત્તઃ કમધમમાચક્ષતે ત્વસદ્વૃત્તમ્ ।
કેન જિતં જગદેતત્સત્યતિતિક્ષાવતા પુંસા ॥ ૧૮॥

કસ્મૈ નમાંસિ દેવાઃ કુર્વન્તિ દયાપ્રધાનાય ।
કસ્માદુદ્વેગઃ સ્યાત્સંસારારણ્યતઃ સુધિયઃ ॥ ૧૯॥

કસ્ય વશે પ્રાણિગણઃ સત્યપ્રિયભાષિણો વિનીતસ્ય ।
ક્વ સ્થાતવ્યં ન્યાય્યે પથિ દૃષ્ટાદૃષ્ટલાભાઢ્યે ॥ ૨૦॥

કોઽન્ધો યોઽકર્યરતઃ કો બધિરો યો હિતાનિ ન શ◌ૃણોતિ ।
કો મૂકો યઃ કાલે પ્રિયાણિ વક્તું ન જાનાતિ ॥ ૨૧॥

કિં દાનમનાકાઙ્ક્ષં કિં મિત્રં યો નિવારયતિ પાપાત્ ।
કોઽલઙ્કારઃ શીલં કિં વાચાં મણ્ડનં સત્યમ્ ॥ ૨૨॥

વિદ્યુદ્વિલસિતચપલં કિં દુર્જનસઙ્ગતિર્યુવતયશ્ચ ।
કુલશીલનિષ્પ્રકમ્પાઃ કે કલિકાલેઽપિ સજ્જના એવ ॥ ૨૩॥

ચિન્તામણિરિવ દુર્લભમિહ કિં કથયામિ તચ્ચતુર્ભદ્રમ્ ।
કિં તદ્વદન્તિ ભૂયો વિધુતતમસા વિશેષેણ ॥ ૨૪॥

દાનં પ્રિયવાક્સહિતં જ્ઞાનમગર્વં ક્ષમાન્વિતં શૌર્યમ્ ।
વિત્તં ત્યાગસમેતં દુર્લભમેતચ્ચતુર્ભદ્રમ્ ॥ ૨૫॥

કિં શોચ્યં કાર્પણ્યં સતિ વિભવે કિં પ્રશસ્તમૌદાર્યમ્ ।
કઃ પૂજ્યો વિદ્વદ્ભિઃ સ્વભાવતઃ સર્વદા વિનીતો યઃ ॥ ૨૬॥

કઃ કુલકમલદિનેશઃ સતિ ગુણાવિભવેઽપિ યો નમ્રઃ ।
કસ્ય વશે જગદેતત્પ્રિયહિતવચનસ્યધર્મનિરતસ્ય ॥ ૨૭॥

વિદ્વન્મનોહરા કા સત્કવિતા બોધવનિતા ચ ।
કં ન સ્પૃશતિ વિપત્તિઃ પ્રવૃદ્ધવચનાનુવર્તિનં દાન્તમ્ ॥ ૨૮॥

કસ્મૈ સ્પૃહયતિ કમલા ત્વનલસચિત્તાય નીતિવૃત્તાય ।
ત્યજતિ ચ કં સહસા દ્વિજગુરુસુરનિન્દાકરં ચ સાલસ્યમ્ ॥ ૨૯॥

કુત્ર વિધેયો વાસઃ સજ્જનનિકટેઽથવા કાશ્યામ્ ।
કઃ પરિહાર્યો દેશઃ પિશુનયુતો લુબ્ધભૂપશ્ચ ॥ ૩૦॥

કેનાશોચ્યઃ પુરુષઃ પ્રણતકલત્રેણ ધીરવિભવેન ।
ઇહ ભુવને કઃ શોચ્યઃ સત્યપિ વિભવે ન યો દાતા ॥ ૩૧॥

કિં લઘુતાયા મૂલં પ્રાકૃતપુરુષેષુ યા યાચ્ઞા ।
રામાદપિ કઃ શૂરઃ સ્મરશરનિહતો ન યશ્ચલતિ ॥ ૩૨॥

કિમહર્નિશમનુચિન્ત્યં ભગવચ્ચરણં ન સંસારઃ ।
ચક્ષુષ્મન્તોઽપ્યન્ધાઃ કે સ્યુઃ યે નાસ્તિકા મનુજાઃ ॥ ૩૩॥

કઃ પઙ્ગુરિહ પ્રથિતો વ્રજતિ ચ યો વાર્દ્ધકે તીર્થમ્ ।
કિં તીર્થમપિ ચ મુખ્યં ચિત્તમલં યન્નિવર્તયતિ ॥ ૩૪॥

કિં સ્મર્ત્તવ્યં પુરુષૈઃ હરિનામ સદા ન યાવની ભાષા ।
કો હિ ન વાચ્યઃ સુધિયા પરદોષશ્ચાનૃતં તદ્વત્ ॥ ૩૫॥

કિં સમ્પાદ્યં મનુજૈઃ વિદ્યા વિત્તં બલં યશઃ પુણ્યમ્ ।
કઃ સર્વગુણવિનાશી લોભઃ શત્રુશ્ચ કઃ કામઃ ॥ ૩૬॥

કા ચ સભા પરિહાર્યા હીના યા વૃદ્ધસચિવેન ।
ઇહ કુત્રાવહિતઃ સ્યાન્મનુજઃ કિલ રાજસેવાયામ્ ॥ ૩૭॥

પ્રાણાદપિ કો રમ્યઃ કુલધર્મઃ સાધુસઙ્ગશ્ચ ।
કા સંરક્ષ્યા કીર્તિઃ પતિવ્રતા નૈજબુદ્ધિશ્ચ ॥ ૩૮॥

કા કલ્પલતા લોકે સચ્છિષ્યાયાર્પિતા વિદ્યા ।

કોઽક્ષયવટવૃક્ષઃ સ્યાત્વિધિવત્સત્પાત્રદત્તદાનં યત્ ॥ ૩૯॥

કિં શસ્ત્રં સર્વેષાં યુક્તિઃ માતા ચ કા ધેનુઃ ।
કિં નુ બલં યદ્ધૈર્યં કો મૃત્યુઃ યદવધાનરહિતત્વમ્ ॥ ૪૦॥

કુત્ર વિષં દુષ્ટજને કિમિહાશૌચં ભવેતૃણં નૃણામ્ ।
કિમભયમિહ વૈરાગ્યં ભયમપિ કિં વિત્તમેવ સર્વેષામ્ ॥ ૪૧॥

કા દુર્લભા નરાણાં હરિભક્તિઃ પાતકં ચ કિં હિંસા ।
કો હિ ભગવત્પ્રિયઃ સ્યાત્યોઽન્યં નોદ્વેજયેદનુદ્વિગ્નઃ ॥ ૪૨॥

કસ્માત્ સિદ્ધિઃ તપસઃ બુદ્ધિઃ ક્વ નુ ભૂસુરે કુતો બુદ્ધિઃ ।
વૃદ્ધોપસેવયા કે વૃદ્ધા યે ધર્મતત્ત્વજ્ઞાઃ ॥ ૪૩॥

સમ્ભાવિતસ્ય મરણાદધિકં કિં દુર્યશો ભવતિ ।
લોકે સુખી ભવેત્કો ધનવાન્ધનમપિ ચ કિં યતશ્ચેષ્ટમ્ ॥ ૪૪॥

સર્વસુખાનાં બીજં કિં પુણ્યં દુઃખમપિ કુતઃ પાપાત્ ।
કસ્યૈશ્વર્યં યઃ કિલ શઙ્કરમારાધયેદ્ભક્ત્યા ॥ ૪૫॥

કો વર્દ્ધતે વિનીતઃ કો વા હીયેત યો દૃપ્તઃ ।
કો ન પ્રત્યેતવ્યો બ્રૂતે યશ્ચાનૃતં શશ્વત્ ॥ ૪૬॥

કુત્રાનૃતેઽપ્યપાપાં યચ્ચોક્તં ધર્મરક્ષાર્થમ્ ।
કો ધર્મોઽભિમતો યઃ શિષ્ટાનાં નિજકુલીનાનામ્ ॥ ૪૭॥

સાધુબલં કિં દૈવં કઃ સાધુઃ સર્વદા તુષ્ટઃ ।
દૈવં કિં યત્સુકૃતં કઃ સુકૃતી શ્લાઘ્યતે ચ યઃ સદ્ભિઃ ॥ ૪૮॥

ગૃહમેધિનશ્ચ મિત્રં કિં ભાર્યા કો ગૃહી ચ યો યજતે ।
કો યજ્ઞો યઃ શ્રુત્યા વિહિતઃ શ્રેયસ્કરો નૃણામ્ ॥ ૪૯॥

કસ્ય ક્રિયા હિ સફલા યઃ પુનરાચારવાં શિષ્ટઃ ।
કઃ શિષ્ટો યો વેદપ્રમાણવાં કો હતઃ ક્રિયાભ્રષ્ટઃ ॥ ૫૦॥

કો ધન્યઃ સંન્યાસી કો માન્યઃ પણ્ડિતઃ સાધુઃ ।
કઃ સેવ્યો યો દાતા કો દાતા યોઽર્થિતૃપ્તિમાતનુતે ॥ ૫૧॥

કિં ભાગ્યં દેહવતામારોગ્યં કઃ ફલી કૃષિકૃત્ ।
કસ્ય ન પાપં જપતઃ કઃ પૂર્ણો યઃ પ્રજાવાં સ્યાત્ ॥ ૫૨॥

કિં દુષ્કરં નરાણાં યન્મનસો નિગ્રહઃ સતતમ્ ।
કો બ્રહ્મચર્યવાં સ્યાત્યશ્ચાસ્ખલિતોર્ધ્વરેતસ્કઃ ॥ ૫૩॥

કા ચ પરદેવતોક્તા ચિચ્છક્તિઃ કો જગત્ભર્તા ।
સૂર્યઃ સર્વેષાં કો જીવનહેતુઃ સ પર્જન્યઃ ॥ ૫૪॥

કઃ શુરો યો ભીતત્રાતા ત્રાતા ચ કઃ સદ્ગુરુઃ ।
કો હિ જગદ્ગુરુરુક્તઃ શમ્ભુઃ જ્ઞાનં કુતઃ શિવાદેવ ॥ ૫૫॥

મુક્તિં લભેત કસ્માન્મુકુન્દભક્તેઃ મુકુન્દઃ કઃ ।
યસ્તારયેદવિદ્યાં કા ચાવિદ્યા યદાત્મનોઽસ્ફૂર્તિઃ ॥ ૫૬॥

કસ્ય ન શોકો યઃ સ્યાદ્ક્રોધઃ કિં સુખં તુષ્ટિઃ ।
કો રાજા રઞ્જનકૃત્કશ્ચ શ્વા નીચસેવકો યઃ સ્યાત્ ॥ ૫૭॥

કો માયી પરમેશઃ ક ઇન્દ્રજાલાયતે પ્રપઞ્ચોઽયમ્ ।
કઃ સ્વપ્નનિભો જાગ્રદ્વ્યવહારઃ સત્યમપિ ચ કિં બ્રહ્મ ॥ ૫૮॥

કિં મિથ્યા યદ્વિદ્યાનાશ્યં તુચ્છં તુ શશવિષાણાદિ ।
કા ચાનિર્વાચ્યા માયા કિં કલ્પિતં દ્વૈતમ્ ॥ ૫૯॥

કિં પારમાર્થિકં સ્યાદદ્વૈતં ચાજ્ઞતા કુતોઽનાદિઃ ।
વપુષશ્ચ પોષકં કિં પ્રારબ્ધં ચાન્નદાયિ કિં ચાયુઃ ॥ ૬૦॥

કો બ્રહ્મણૈરુપાસ્યો ગાયત્ર્યર્કાગ્નિગોચરઃ શમ્ભુઃ ।
ગાયત્ર્યામાદિત્યે ચાગ્નૌ શમ્ભ ચ કિં નુ તત્તત્ત્વમ્ ॥ ૬૧॥

પ્રાત્યક્ષદેવતા કા માતા પૂજ્યો ગુરુશ્ચ કઃ તાતઃ ।
કઃ સર્વદેવતાત્મા વિદ્યાકર્માન્વિતો વિપ્રઃ ॥ ૬૨॥

કશ્ચ કુલક્ષયહેતુઃ સન્તાપઃ સજ્જનેષુ યોઽકારિ ।
કેષામમોઘ વચનં યે ચ પુનઃ સત્યમૌનશમશીલાઃ ॥ ૬૩॥

કિં જન્મ વિષયસઙ્ગઃ કિમુત્તરં જન્મ પુત્રઃ સ્યાત્ ।
કોઽપરિહાર્યો મૃત્યુઃ કુત્ર પદં વિન્યસેચ્ચ દૃક્પૂતે ॥ ૬૪॥

પાત્રં કિમન્નદાને ક્ષુધિતં કોઽર્ચ્યો હિ ભગવદવતારઃ ।
કશ્ચ ભગવાન્મહેશઃ શઙ્કરનારાયણાત્મૈકઃ ॥ ૬૫॥

ફલમપિ ભગવદ્ભક્તેઃ કિં તલ્લોકસ્વરુપસાક્ષાત્ત્વમ્ ।
મોક્ષશ્ચ કો હ્યવિદ્યાસ્તમયઃ કઃ સર્વવેદભૂઃ અથ ચ ૐ ॥ ૬૬॥

ઇત્યેષા કણ્ઠસ્થા પ્રશ્નોત્તરરત્નમાલિકા યેષામ્ ।
તે મુક્તાભરણા ઇવ વિમલાશ્ચાભાન્તિ સત્સમાજેષુ ॥ ૬૭॥

॥ ઇતિ શ્રીમદ્ શઙ્કરાચાર્યવિરચિતા પ્રશ્નોત્તરરત્નમાલિકા સમાપ્તા ॥

Encoded and proofread by Sorin Suciu aka SeSe at sorins at hotmail.com.

*prashnottararatnamAlikA*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*